
# सप्तमः पाठः वाचनप्रशंसा । (सरलार्थलेखनार्थम्)

डॉ. ए. पी. जे. अब्दुलकलाममहोदयः 'मिसाईल मॅन' इति बिरुदेन ख्यातः। तस्य जीवने तेन छात्राणां शैक्षणिकविकासार्थं नैके यत्नाः कृताः । १५ ऑक्टोबर इति तस्य जन्मदिनं 'वाचनप्रेरणादिवसरूपेण' आचर्यते । विविधानां ग्रन्थानां, लघुग्रन्थानां, वृत्तपत्राणां वाचनेन मनुष्ये के गुणाः विकसिताः भवन्ति, इत्यादयः विषयाः पद्येऽस्मिन् वर्णिताः सन्ति ।

- पाठ्यपुस्तकं विहाय यूयं किं किं पठथ ?
- साहित्यस्य के प्रकाराः भवन्ति ?
- अपि यूयं प्रतिदिनं वृत्तपत्रं पठथ ?





शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।  
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।१।।

मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।  
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।२।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।  
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ।।३।।

अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।  
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।४।।

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।  
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।५।।

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।  
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।६।।

**१) सन्धिविग्रहः** -१) विज्ञानमेव = विज्ञानम् + एव। २) उत्साहो वर्धते = उत्साहः + वर्धते ।

**अन्वयः** - येन शीलं, सद्गुणसम्पत्तिः, ज्ञानं, विज्ञानम् उत्साहः च वर्धते तद् वाचनं हितावहम् एव ।

**२) सन्धिविग्रहः** -१) वाचनेनैव = वाचनेन + एव । २) दक्षा भवन्ति = दक्षाः + भवन्ति ।

**अन्वयः** - मनुजाः वाचनेन एव बहून् विषयान् बोधन्ते । वाचनेन (मनुजाः) कार्येषु दक्षाः बहुश्रुताः (च) भवन्ति।

**३) अन्वयः** - ये सदा वाचने रताः तान् वाल्मीकि-व्यास-बाणाद्याः प्राचीनाः कविपण्डिताः शिक्षयन्ति।

**४) सन्धिविग्रहः** -१) अद्ययावद्धि = अद्ययावत् + हि । २) पठेत्सदा = पठेत् + सदा ।
३) वाचनमुपकारकम् = वाचनम् + उपकारकम् ।

**अन्वयः** - मनुजः अद्ययावद् ज्ञानाय वृत्तपत्रं सदा हि पठेत् । सर्वविधसुविद्यार्थं वाचनम् उपकारकम् (वर्तते) ।

**५) सन्धिविग्रहः** -१) कालक्षेपो न = कालक्षेपः + न । २) कर्तव्यो विद्यार्थी = कर्तव्यः + विद्यार्थी ।

**अन्वयः** - (विद्यार्थिभिः) वृथाभ्रमण-कुक्रीडा-परपीडा-अपभाषणैः कालक्षेपः न कर्तव्यः । विद्यार्थी वाचनं श्रयेत् ।

**६) अन्वयः** - वाचनं बाल्ये ज्ञानदं, तारुण्ये शीलरक्षकम्, वार्धक्ये दुःखहरणं (भवति) (अतः) सद्ग्रन्थवाचनं हितं (भवति)।

## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) वाचनेन के गुणाः वर्धन्ते ?

आ) वाचनेन मनुजाः किं बोधन्ते ?

इ) विद्यार्थिभिः कथं कालक्षेपः न कर्तव्यः ?

**२. माध्यमभाषया उत्तरं लिखत ।**


अ) वाचनमुपकारकं कथम् इति स्पष्टीकुरुत ।

**३. समानार्थकशब्दान् लिखत ।**


शीलम्, दक्षः, रताः, कालक्षेपः, वार्धक्यम्, पण्डितः

**४. जालरेखाचित्रं पूरयत ।**


अ)




आ)




इ)




**५. विरुद्धार्थकशब्दान् लिखत ।**

सद्गुणः, उत्साहः, प्राचीनाः, उपकारकम्

**६. सन्धिविग्रहं कुरुत ।**

अ) वाचनेनैव आ) अद्ययावद्धि

**७. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| उपकारकम् | मनुजाः |
| प्राचीनाः | विषयान् |
| दक्षाः | वाचनम् |
| बहून् | कविपण्डिताः |

**८. अमरकोषात् योग्यं समानार्थशब्दं योजयित्वा वाक्यं पुनर्लिखत ।**

अ) <u>मनुजाः</u> वाचनेन बहून् विषयान् बोधन्ते ।

**पठत-बोधत**

**पठनस्य दोषाः**

**गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।।**

**उच्चारणविषयकश्लोकः ।**

**व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ।।**

7H2QUI